# अभिज्ञानशकुन्तलस्य समाज चित्रम्

नन्दिता देववर्मा

## भूमिका –

महाकवि कालिदास विरचितं 'अभिज्ञानशकुन्तलम्' नाटकम् विश्वस्य सर्वश्रेष्ठः नाटकम्। अस्मिन् नाटके सप्त अङ्काः सन्ति । नाटकस्य नायकः हस्तिनापुरस्य राजा दुष्यन्त एवं नायिका विश्वामित्रमेनकायाः पुत्री 'शकुन्तला' । जन्मनः परं शकुन्तला मातृ परित्यक्ता आसीत ततः परं कण्वमुनिना पालिता आसीत् । शकुन्तला अपूर्व सुन्दरी आसीत् । एकस्मिन् दिवसे राजा दुष्यन्त मृगयार्थं वहिः आगतवान्, तदा शकुन्तला दृष्टा आकृष्ट अभवत् एवं गान्धर्वविधिना शकुन्तलया सह विवाह अभवत् । अभिज्ञानस्वरूपं एकं अङ्गुरीयकं शकुन्तलां दत्वा हस्तिनापुरं प्रति प्रस्थानं कृतवान । ततः परं किमपि कारणवशात् शकुन्तला दुर्वाससः कर्तृक अभिशप्ता, तेन कारणेन दुष्यतेन सह विच्छेदः, शचीतीर्थे तस्याः अङ्गुरीयकं पतनं, चुनः मारीच–मुनेः आश्रमे तस्याः निवासः, सर्वदमनस्य जन्म इत्यादि विषयकं धटनां विहाय अस्मिन् नाटके महाकवि कालिदास प्रकृत्याः विवरणं, शकुन्तलायाः सौन्दर्यवर्णना, राजा दुष्यन्तस्यगुणाः, सुन्दरया उपमया विवृतवान् तदर्थं ऐतिहासिकाः वदन्ति 'उपमा कालिदासस्य', एवं च तस्मिन् समये समाजस्य व्यवस्या कीदृशी तस्याः विवरणमऽपि सुन्दरतया कृतवान । सामाजिकविषये कानिचन् विन्दवः निम्ने उल्लेखितम् अस्ति ।

(क) **वर्णाश्रमव्यवस्था** – तस्मिन् समये वर्णाश्रमव्यवस्थायाः प्रभावः आसीत् । वर्णाश्रमव्यवस्थायाः रक्षकः आसीत् राजा । वर्णश्रेष्ठः ब्राह्मणस्य उपरि राज्ञः अतीव श्रद्धा आसीत् । तस्मिन् समये याजयज्ञादि नियमितरूपेन प्रचलितम् आसीत् । कर्तव्यं प्रति सामान्यतम शैथिल्यं तिरस्कारस्य कारणम् आसीत् । तस्मिन समये स्वधर्मपालनं एव श्रेष्ठम् इति चिन्तनम् आसीत् ।

(ख) **राजा एवं राज्यशासनम्** – कालिदासस्य समये राजा एव स्वतन्त्ररूपेण राज्यशासनं कृतवान आसीत् । राज्ञः विचारं एव श्रेष्ठं विचारम् आसीत् ।

(ग) **करव्यवस्था** – तस्मिन् समये करव्यवस्थाऽपि प्रचलिता आसीत् । राजा प्रजाभ्यः उत्पन्नशस्येषु एक षष्ठांश वार्षिककर गृहीतवान् आसीत् ।

(घ) **असवर्णविवाह** – कालिदासस्य समये असवर्णविवाह प्रथा प्रचलितम् आसीत् । दुष्यन्त यदा शकुन्तलां प्रथमं दृष्टवान् तदा चिन्तितवान् 'शकुन्तला निश्चयं महर्षिकण्वमुनेः असवर्णपत्न्याः पुत्री अस्ति' एतेन चिन्तनेन ज्ञातुं शक्नुमः तस्मिन् समये असवर्ण विवाह प्रथा प्रचलिता आसीत् ।

(ङ) **वहुविवाहप्रथा** – तस्मिन् समये वहुविवाहः प्रथा प्रचलिता आसीत् । राजा दुष्यन्तऽपि वहुविवाहं कृतवान् आसीत् ।

(च) **गान्धर्वविवाह** – प्राचीन धर्मशास्त्रं मनुसंहितायां अष्टप्रकाराः हिन्दुविवाहस्य उल्लेखम् अस्ति यथा – ब्राह्म, दैव, आर्य, आसुर, गान्धर्व इत्यादयः तेषु गान्धर्वविवाहमपि शास्त्रानुमोदित, नायक–नायिकायाः अनुरागस्य हेतोः एतद् विवाहं भवति, राजा दुष्यन्तऽपि गान्धर्वविधिना शकुन्तलां परिणितवान् ।

(छ) **स्त्रीशिक्षा एवं चित्रलेखनम्** – तस्मिन् समये चित्रलेखनस्य अपि चर्चा आसीत् । राजा–दुष्यन्त विरहस्य अपनोदनार्थं शकुन्तलायाः चित्रम् अङ्कनं कृत्वा मानसिकसान्तनां प्राप्तवान् आसीत् । तादृशानि वहुनि उदाहरनानि सन्ति । सुप्राचीनयुगे नारी शिक्षायाः अपि प्रचलनम् आसीत् । विदूषीनारीनां परिचयं अपि वयं ज्ञातुं शक्नुमः यथा अहल्या, गार्गी, मैत्रेयी इत्यादयः । पुथिगतविद्यायां शिक्षा सीमावद्ध नासीत् । श्रुतिनाऽपि ज्ञानस्य चर्चा असीत् ।

(ज) **सुगृहीण्याः कर्त्तव्य** – पतिगृहे यात्राकाले शकुन्तलां प्रति महर्षिकण्वमुनेः

REDMI NOTE 5 PRO
MI DUAL CAMERA
2019/9/13

वामा कुलस्याधय: ।

अस्मिन् श्लोके गृहीण्या: कर्तव्यं किं तस्मिन् महर्षिकण्व शकुन्तलां स्पष्टतया बोधितवान् ।

(झ) **नौवाणिज्य एवं आन्तर्देशीयवाणिज्य** – तस्मिन् समये स्थलपथे जलपथेऽपि विभिन्नदेशेन सह वाणिज्यव्यवस्था प्रचलिता आसीत् । उदाहरणं नाटकस्य षष्ठ अङ्के वर्णितम् अस्ति नौव्यवसायी धनमित्रस्य कथा ।

(ञ) **आरक्षविभाग** – तस्मिन् समये आरक्षविभागऽपि आसीत् । आरक्षका: एव धीवरं धृत्वा राज्ञ: समीपं नीतवन्त: आसन् ।

(ट) **चौर्य अपराधे मृत्युदण्डादेश:** – साधारणत: चौर्यअपराधेऽपि मृत्युदण्डादेश: आसीत् । भिन्नरुपेण मृत्युदण्डस्य व्यवस्था आसीत् । यथा – उन्मतया कुक्कुरेण जीवन्त भक्षणं एवं उन्मतया हस्तिना पदतले पेषणं कारयित्वा तथा च शूले आरोहणं कारयित्वा मृत्यु: इत्यादय: । अन्तिमेऽस्ति तस्मिन समये स्ववृत्तिं प्रति मर्यादावोध: आसीत्, नारीणां स्वाधीनता नासीत्, विचारव्यवस्था राज्ञ: उपरि एव निर्भरम् आसीत् । राज्ञ· विचारम् एव चुडान्त निर्णयम् आसीत् ।

NOTE 5 PRO
CAMERA